International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(4): 157-160
© 2021 IJSR
www.anantaajournal.com
Received: 04-05-2021
Accepted: 08-06-2021

**Asis Gharui**
Research Scholar,
Visva-Bharati, Santiniketan,
West Bengal, India

**Corresponding Author:**
**Asis Gharui**
Research Scholar,
Visva-Bharati, Santiniketan,
West Bengal, India

# ऋग्वेदाधारेण इन्द्रदेवस्य स्वरूपनिरूपणम् : एका समीक्षा

**Asis Gharui**

**शोधसारः**
संस्कृतवाङ्मये वेदानां स्थानं सर्वोपरि वर्तते। भूमण्डलेऽस्मिन् समुपलब्धेषु विविधभाषागत-प्राचीनग्रन्थेषु वेदः सर्वेभ्यः प्राचीनतम इति अंगीक्रियते। संहिता-ब्राह्मणारण्यकोपनिषदभिप्रायेण वेदस्य चतुर्विभागा विद्यन्ते। एतेषु चतुर्षु विभागेषु मन्त्रसमन्वितो भागः संहिताशब्देनाभिधीयते।एतेषु चतुर्षु संहितासु ऋक्संहिता वैदिकदेवस्तुतिपरका। प्रबन्धेऽस्मिन् साक्षातकृतधर्माभिः ऋषिभिर्दृष्टमन्त्राधारेण इन्द्रदेवस्य स्वरूपमलंक्रियते।

**कूटशब्दाः** वेदशब्दस्य व्युत्पत्तिनिरूपणम्, वेदस्य विभागः, इन्द्रशब्दस्य व्युत्पत्तिनिरूपणम्, इन्द्रस्य जन्मवृत्तान्तः, इन्द्रस्य कायिकवर्णम्, इन्द्रायुधस्य वर्णनम्।

## प्रस्तावना

विश्वस्य प्राचीनतमं साहित्यं तु वैदिकसाहित्यम् ।भारतीयपरम्परानुसारेण सृष्टिक्रमस्य आद्या वाणी एव वेद इति। श्वेताश्वतरोपनिषदि प्रतिपादितं यत्-"यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" (श्वेताश्वेतर उपनिषद् 6.18)। तस्मात् भारतीयसंस्कृतेर्मूलग्रन्थो वेद इति। वेदशब्दः शाब्दिकविधानेन विश्लेष्यते यत् 'वेद' इति शब्दो ज्ञानार्थक विद् धातुना सह घञ् प्रत्ययेन निष्पद्यते।अस्मात् विद्वद्भिरूच्चार्यते यत् यत्र धर्मादिपुरुषार्थचतुष्टयानां सिद्ध्यर्थमुपाया वर्ण्यन्ते स एव वेदः। वेद्यन्ते ज्ञायन्ते धर्मादिपुरुषार्थचतुष्टयोपाया येन स वेदः।[1]
तर्हि अभिलक्ष्यते यत् ऐहिकामुष्मिकफलप्राप्तेः अलौकिकोपायस्य निदर्शकोऽपौरुषेयविशिष्टानुपूर्वको मन्त्रब्राह्मणात्मकः शब्दराशिः वेद इत्यभिप्रायः।
जगतः सृष्टेर्प्राक् वेद एक एवासीत् ।[2] कालान्तरे अस्य विभागो जातः । संहितारूपेण वेदचतुष्टयम्। यथा- ऋकसंहिता-यजुसंहिता-सामसंहिता-अथर्वसंहिता चेति। परन्तु वेदानां संख्याविषये पण्डिता नैकत्वं मन्यन्ते । केचन वेदानां त्रित्वमेव स्वीकुर्वन्ति । यथा आह भगवान् जैमिनि"तेषामृग यत्रार्थवशोन पादव्यवस्ता,गीतिषु सामाख्या, शेषे यजुष्शब्दः" (मीमांसासूत्र 2.1.35-37) । तथैव शतपथब्राह्मणे संप्राप्यते-"सैषां त्रय्येव विद्या तपति" (शतपथब्राह्मण 10.3.6.2) । "अपि च त्रयी वै विद्या" (शतपथब्राह्मण 4.6.7.9) । अनेन रूपेण वैदिकसाहित्येषु अनेकेषु स्थानेषु 'त्रयी'इति आख्यातेनापि वेदः समाद्रियते।

---
[1] कात्यायन श्रौतसूत्रम्. भूमिका.पृष्टा-4
[2] एक एव पुरावेदः प्रणवः सर्ववाङ्मयः। भागवतपुराण 9.14.48

संहिताचतुष्टयेषु सर्वाधिकमहत्वपूर्णसंहिता अस्ति ऋग्वेदसंहिता। ऋग्वेदे ऋचां संग्रहः विद्यते ।चतसृषु संहिताषु ऋक्संहिता हि प्रचीनतमा । ऋक्संहिताया वहवो मन्त्रा अन्यसंहितासु उपलभ्यन्ते । यथा सामसंहितायां विद्यमानाः प्रायशः सर्वे मन्त्रा ऋक्संहितायां प्राप्यन्ते । यजुर्वेदीयतैत्तिरीयसंहितायाम् ऋक्संहिताया वहुमन्त्रा उपलभ्यन्ते । एतदतिरिक्तम् अथर्ववेदीयशौनकसंहितायाम् ऋक्संहितायाः प्रायो द्वादशशतसंख्याका मन्त्रा विद्यन्ते ।

वैदिकवाङ्मये ज्ञानप्रदमन्त्राणां विशालराशिर्विद्यते । तत्र आलोचितविषयेषु देवतत्त्वस्य गुरुत्वमपरिहार्यम् । अधिकसंख्यकेषु वैदिकसूक्तेषु ऋषिभिः भाषाभिव्यञ्जकशब्दैः स्वाभीष्टसिद्ध्यर्थं देवस्तुतिः कृता । अखिले ऋग्वेदे देवस्तुतौ बहूनि वैचित्र्याण्यपि परिलक्ष्यन्ते । साधारणतया एकस्य देवस्य कृते सूक्तमेकं व्यवह्रियते ।अर्थात् ऋषिभिः इन्द्र-अग्नि-वरुणादिदेवानां सूक्तेषु स्वतन्त्रदेवरूपेण स्तूयन्ते । एतेषां सूक्तानां संख्या अधिकाः ।कुत्रापि वा एकस्मिन् सूक्ते एकाधिकदेवानां अर्थात् गणदेवानां स्तुतिरपि परिदृश्यते ।

### ऋग्वेदाधारेण इन्द्र देवः

वैदिकदेवेषु इन्द्रः प्रधानदेवः ।स शक्ति-बल-ओजगुणानां प्रतीकः । आचार्ययास्कविरचिते निरुक्तशास्त्रे त्रिस्थानीयदेवेषु इन्द्रोऽन्तरिक्षस्थानीयो देवः ।[3] अखिले ऋग्वेदे दशमण्डलेषु केवलं नवममण्डलं व्यतिरिच्य प्रायः सर्वेषु मण्डलेषु इन्द्रस्य प्राधान्यं दरीदृश्यते। अखण्डे ऋग्वेदे प्राय एक-चतुर्थांशसूक्तानि इन्द्रसम्बन्धितानि । डॉ. जयदत्त उप्रेती इति महोदयेन विरचिते‘वेद मे इन्द्र’इति नामाख्याते ग्रन्थे त्रयदशतमे पृष्ठे इन्द्रसम्बन्धित ऋग्वेदीयमन्त्राणां प्रस्तुततालिका अधस्ताद् उपस्थाप्यते ।

| मण्डलम् | सम्पूर्णसूक्त संख्याः | सम्पूर्णमन्त्र संख्याः | इन्द्रसम्बन्धित सूक्तानि | इन्दसम्बन्धित मन्त्राः |
|---|---|---|---|---|
| प्रथममण्डलम् | 191 | 2006 | 51 | 483 |
| द्वितीयमण्डलम् | 43 | 429 | 18 | 155 |
| तृतीयमण्डलम् | 62 | 617 | 24 | 273 |
| चतुर्थमण्डलम् | 58 | 589 | 15 | 193 |
| पञ्चममण्डलम् | 87 | 727 | 12 | 107 |
| षष्ठमण्डलम् | 75 | 765 | 31 | 392 |
| सप्तममण्डलम् | 104 | 841 | 19 | 134 |
| अष्टममण्डलम् | 103 | 1716 | 53 | 868 |
| नवममण्डलम् | 114 | 1108 | 00 | 00 |
| दशममण्डलम् | 191 | 1754 | 46 | 382 |
| साकल्यम् | 1028 | 10552 | 272 | 2884 |

[3] वायुर्वेन्द्रोवान्तरिक्षस्थानः। निरुक्त 7.5.2

ऊर्ध्वोल्लिखितसारण्यावगम्यते यत् समग्रे ऋग्वेदे सर्वेषु सूक्तेषु 26.36 प्रतिशतानि सूक्तानि, सर्वेषु मन्त्रेषु च 27.26 प्रतिशतसंख्यका मन्त्रा इन्द्रसम्बन्धिताः ।अत्र बालखिल्यसूक्तेषु इन्द्रसम्बन्धितानि षट्वालखिल्यसूक्तान्यपि समाजातानि । श्रीपाद-दामोदर-सातवलकरानुसारेण अखण्डे ऋग्वेदे इन्द्रसम्बन्धितसूक्तानां संख्याः 269 इति ।[4]अतः स्तुतिदृष्ट्वा ऋग्वैदिकवाङ्मये इन्द्रः श्रेष्ठदेवरूपेण परिगण्यते ।

इन्द्रशब्दस्य व्याकरणविश्लेषणं दयानन्दाचार्येण प्रदीयते । यथा- “इन्दति परमैश्वर्यवान् भवतीति इन्द्रः समर्थोऽन्तरात्मादित्यो योगो वा” (उणादिकोषवृत्ति 2.29)। अर्थात् य ऐश्वर्यवान् स इन्द्रः। अथवा यः शासकः स इन्द्रः। निरुक्तकारेण यास्काचार्येण वहुविधैर्निर्वचनैः ‘इन्द्र’ इति पदस्य विश्लेषणं क्रियते । तत्र प्राथमिकतया इन्द्रशब्दस्य निर्वचनविषये यास्काचार्येण यथोक्तम्-“इन्द्र इरां दृणातीति वा” (निरुक्त10.8.5) । अर्थात् इन्द्र ‘इरा’ नाम अन्नस्य विदीर्णं करोति । अन्नं तु तद्हेतुभूतजलं अर्थात् जलाधारभूतमेघ इति । मेघमिमं विदीर्णं कृत्वा इन्द्रदेवो धारारूपेण पृथिव्यां जलवर्षणं कारयति । एतद्विहाय ‘इरा’ नाम शस्यवीजमस्ति,यस्मादन्नं जायते । एतेषां बीजानां अङ्कुरोद्गमनार्थमिन्द्र एव वृष्टिं कारयति ।

अत्र यास्काचार्येण इन्द्रशब्दस्य निर्वचने उच्यते यत्- “ इरां ददातीति वा इरां ददातीति वा ” (निरुक्त10.8.6) ।अर्थात् ‘इरा’ नाम अन्नस्य दानत्वात् धारणत्वात् वा इन्द्रस्य इन्द्रत्वम् ।अनन्तरं यास्काचार्येण उच्यते “इरां दारयत इति वा” (निरुक्त10.8.7)। अर्थात् इन्द्रदेव अन्नविदारणत्वात् इन्द्रत्वं पदमाप्नोति ।इतोऽपि इन्द्रस्यान्नधारणत्वात् इन्द्र इत्याख्यातः। तस्मात् निरुक्तकारेण यथोक्तम् “इरां धारयत इति वा” (निरुक्त10.8.8)। इन्द्रदेव इन्दु निर्मितत्वात् अर्थात् सोमपानार्थं धावमानो भवति,अतो निरुक्ते उल्लिख्यते “इन्दवे द्रवतीति वा” (10.8.9) ।इन्द्रदेवः सोमपाने प्रीत आनन्दितो वा भवति ।तस्मात् कारणात् यास्काचार्येण निर्वचनं क्रियते यत्-“इन्दौ रमत इति वा” (नि.10.8.10) ।इतः परं यास्कमहाभागेन लिखितम् “इन्धे भूतानीति वा” (नि. 10.8.11) । अर्थात् प्राणीसमूहेभ्योऽन्नं प्रदाय द्युतिविशिष्टं करोति। तस्मात् दीप्तार्थकात् इन्ध्-धातौ इन्द्रः शब्दः समाजातः । वचनस्यास्य प्रामाण्यं ब्राह्मणवाक्येऽपि समुपलभ्यते । शतपथब्राह्मणानुसारेण शरीरमध्यवर्तीमुख्यप्राणवायुरेव इन्द्रः ।[5]

[4] श्रीपाद-दामोदर-सातवलकर वैवतसंहिता , इन्द्र-देवतासूक्तविवरणम्।

[5] तं वा एतमिन्धं सन्तमिन्द्रमित्याचक्षते। श.ब्रा. 14.5.9.2

अखिले ऋग्वेदे पूर्णाङ्गसूक्तद्वये इन्द्रदेवस्य जन्मवृत्तान्तम् अलंक्रियते ।[6] स जातमात्रैव सर्वान् लोकान् प्रकाशितवान् ।[7] तस्य मातुर्नाम ऋग्वेदे असंख्यस्थानेषु प्राप्यते । ऋषिबुधमतानुसारेण तस्य माता निष्टिग्री (अदितिः) ।[8] विषयेऽस्मिन् सायणेन भाष्यते यत् "निष्टिं दितिं स्वसपत्नीं गिरतीति निष्टिग्रीरदितिः तस्याः पुत्रमिन्द्रम्" (सा.भा. 10.101.12) । ऋग्वेदे अपरे स्थाने तस्य माता गृष्टिः अर्थात् गौ इति उच्यते ।[9] अतः वैदिकसाहित्ये 'गार्ष्टेय' इति विशेषणेनेन्द्रो विशेषितः । ऋग्वेदानुसारेण तस्य पितुर्नाम द्यौ ।[10] पुरुषसुक्तानुसारेण स विराट्पुरुषस्य मुखादेव जायते ।[11] तस्य जन्मक्षणे द्यावापृथिवी प्रकम्पितवन्तौ ।[12] स जातमात्रेणैव महान् अजेययोद्धा अभवत् ।[13] तस्य पत्नी इन्द्राणी ।[14]

प्रसिद्धे ऋग्वेदे अनेकेषु मन्त्रेषु इन्द्रस्य कायिकवर्णनं दरीदृश्यते । ऋषिविश्वामित्रेण इन्द्रस्य सोमपानवर्णनावसरे उच्यते यत्- "ह्रदा इव कुक्षयः सोमधानाः" (ऋक्. 3.36.8) अर्थात् इन्द्रस्य उदरं ह्रदसमानम् । तस्य हनुरतीव सुन्दरः । अतः तस्य कृते ऋग्वेदे 'सुशिप्र' इति विशेषणम् असंख्यवारं संयोजितम् ।[15] स हिरण्यश्मश्रुयुक्तश्च ।[16] तस्य अवयवो हरितः ।[17] तस्य बाहुः सुदीर्घो बलसम्पन्नश्च ।[18] वज्र इव तस्य बाहुः सुदृढः । अतः स वज्रबाहुर्नाम्ना सुप्रसिद्धः । स आदित्य इव तेजस्वी ।[19] स मायया स्वीयानुरूपमवयवं धारयितुं समर्थोऽस्ति ।[20]

इन्द्रदेवस्य प्रधानायुधो वज्रः,यः तडितः प्रतीकः । वज्रस्य स्वरूपकथनावसरे ऋषिगौतमेन भाष्यते यत्-

"त्वष्टा यद्वज्रं सुकृतं हिरण्ययं सहस्रभृष्टिं स्वपा अवर्तयत् ।
धत्त इन्द्रोनर्यपांसि कर्तवेहन्वृत्रं निरपामौब्जदर्णवम् ।।" (ऋक्. 1.85.9)

मन्त्रस्यास्य व्याख्याप्रसङ्गे सायणाचार्येण लिख्यते यत्- "स्वपाः शोभनकर्मा त्वष्टाविश्वनिर्माता यद्वज्रम् अवर्तयत् इन्द्रं प्रत्यगमयत् दत्तवानित्यर्थः कीदृशं सुकृतं सम्यक् निष्पादितं हिरण्ययं सुवर्णमयं सहस्रभृष्टिम् अनेकाभिर्धाराभिर्युक्तं तद्वज्रं इन्द्रोधत्ते धारयति किमर्थं नरि अत्रनृसंबन्धात् नृशब्देन संग्रमोऽभिधीयते संग्रामे अपांसि शत्रुहननादिलक्षणानि कर्माणि कर्तवे कर्तुं एवं वज्रं धृत्वा तेन वज्रेण वृत्रं वृष्ट्युदकस्यावरकं अर्णवं अर्णसोदकेन युक्तं मेघम् अहन् अवधीत् अपां तेन निरुद्धा अपश्च निरौब्जत् निःशेषेणाधोमुखम् अपातयत् प्रवृष्टा अकरोदित्यर्थः ।" (सायणभाष्यम् ऋक्. 1.85.9)

अर्थात् शोभनकर्मणा त्वष्टा सुनिर्मितो हिरण्मयो वज्र इन्द्राय प्रदीयते ।वृत्रवधाय इन्द्रेण अयं तीक्ष्णो वज्रः स्वीक्रियते ।एतदतिरिक्तम् ऋग्वेदे अन्यत्र इन्द्रवज्रः अयसेन सुनिर्मितम् इदमुक्तम् ।[21] वज्रं विहाय अङ्कुश-जाल-धनुषबाणादिभिरायुधैरिन्द्रः सुसज्जितः ।[22]

सोमेन सार्धमिन्द्रस्य समवायसम्बन्धो वर्तते ।तस्य प्रियतमः पेयद्रव्यः सोम इति ।तेन जन्मनः परमेव सोमोऽपीयत ।[23]अतः तस्य कृते सोमपातादिनी बहूनि विशेषणपदानि संयोजितानि ।'सोमपा' इति नाम्ना स वैदिकदेवमण्डलेषु प्रसिद्धः ।शत्रुसंहारात् प्राक् तेन सोमः पीयते ।[24] सोमपानार्थं तस्य उदरं सदा विचलितम् ।सोमपानकाले तस्य उदरं समुद्र इव वर्धते ।विषयेऽस्मिन् ऋग्वेदे प्रतिपाद्यते यत्-

"यः कुक्षिः सोमपातमः समुद्र इव पिन्वते ।
उर्वीरापोनकाकुदः ।।" (ऋक्. 1.8.7)

अर्थात् इन्द्रस्य उदरं सोमपानाय सदा तत्परम् । तस्य सोमासक्तोदरं समुद्र इव बृहदाकारम् । जिहाजलानुरूपं तस्य उदरस्थोदकं कदापि शून्यं न भवति । एतद्व्यतिरिच्य प्रसिद्धे 'ऐन्द्र-लवसूक्ते'[25] इन्द्रस्य सोमासक्तेः परिचयो दरीदृश्यते । सोमयागे माध्यन्दिनसवने स आहुतदेवरूपेणाभिनन्दितः ।

[6] ऋग्वेद 3.48.1-5, 5.18.1-13
[7] जज्ञानो हरितो वृषा विश्वमाभानति रोचनम् । ऋक्. 3.44.4
[8] निष्टिग्र्यः पुत्रमा च्यावयोतय इन्द्रं सबाध इह सोमपीतये । ऋक्. 10.101.12
[9] गृष्टिः ससूव स्थाविरं तवागामनाधृष्यं वृषभं तुममिन्द्रम् । ऋक्. 4.18.10
[10] सुवीरस्ते जनिता मन्यत द्यौरिन्द्रस्य कर्ता स्वपस्तमो भूत् । ऋक्. 4.17.4
[11] मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत । ऋक्. 10.90.13
[12] तवत्विषौ जनिमन्रेजतद्यौरेजद्भूमिर्भियसास्वस्य मन्योः । ऋक्. 4.17.2
[13] जातं यत्त्वापरिदेवता अभूषन्महेभरायपुरुहुतविश्वे . ऋक्. 3.51.8
[14] ऋक्. 1.22.12 2.32.8 10.86.9 आदि
[15] ऋक्. 2.12.6, 3.30.3,3.50.2,5.36.5 इत्यादि
[16] सोचिन्तु वृष्टिर्युथ्यास्वा सचाँ इन्द्रः श्मश्रुणि हरिताभि प्रष्णुते । ऋक्. 10.23.4
[17] इन्द्रो वज्री हिरण्ययः । ऋक्. 1.7.2
[18] पृथू करस्ता बहुला गभस्ती । ऋक्. 6.19.3
बृहदुक्थं हवामहे सृप्रकरस्नमूतये । ऋक्. 8.32.10
[19] हरित्वता वर्चसा सूर्यस्य श्रेष्ठै रूपैस्तन्वं स्पर्शयस्व ।
अस्माभिरिन्द्र सखिभिर्हुवानः सध्रीचीनो मादयस्वा निषद्य । ऋक्. 10.112.3
[20] रूपंरूपं मघवा बोभवीति मायाः कृण्वानस्तन्वं परिस्वाम् । ऋक्. 3.53.8
इन्द्रो मायाभिः पुरुरूप ईयते । ऋक्. 6.47.18

[21] अयच्छथा बाहोर्वज्रमायसमधारयो दिव्या सूर्यं दृशे । ऋक् . 1.52.8
[22] इमे बिभर्मि सुकृतं ते अङ्कुशं येना रुजासि मघवञ्छफारुजः । ऋक्. 10.44.9
संसृष्टजित्सोमपा बाहुशर्ध्युग्रधस्वा प्रतिहिताभिरस्ता । ऋक्. 10.103.3
[23] यज्जायथास्तदहरस्य कामेंशोः पीयुषमपिवोगिरिष्ठाम् । ऋक्. 3.48.2
[24] अस्य पीत्वा शतक्रतो घनो वृत्राणामभवः । प्रावो वाजेषु वाजिनम् ।। ऋक्. 1.4.8
[25] ऋक्. 10.119.1-13

एतस्मात् कारणात् सोमपानाय ऋषिभिरिन्द्रो भूयो भूयः सम्बोध्यते ।

## उपसंहारः

वैदिकदेवेष्विन्द्रः श्रेष्ठतमः ।निरुक्तकारेणापि स्पष्टतया उच्यते "या च का च बलकृतिरिन्द्रकमैव तत्" (निरुक्त 7.10.2) । ऋग्वेदेऽपि उक्तम् "इन्द्रस्य नु वीर्याणि प्रवोचम्" (ऋक्. 1.32.1) । स द्युलोकस्य भूलोकस्य अन्तरिक्षलोकस्य चाधिपतिः ।[26] स सूर्यस्य उषसः च जनकः,स अपां प्रभुः ।[27] स कम्पमानां पृथिवीमदृंहत्,स इतस्ततः पर्वतान् स्वेषु स्थानेषु स्थापितवान् ।[28] संग्रामेषु तेन शत्रवो विनश्यन्ते ।[29] तेन विना संग्रामेषु जयलाभः असम्भवः ।[30] स नगरध्वंसकः पुरन्दरः । तेन शत्रूणां शतसंख्यानि नगराणि क्षीयन्ते ।तेन कृतेषु कार्येषु प्रमुखो वृत्रवधः ।स बलेन वृत्रमजृंहद् ।[31] अस्मात् इन्द्रस्य कृते 'वृत्रहन' इति विशेषणपदं सप्ततिवारमृग्वेदे व्यवह्रियते ।[32] तेन प्रतिबन्धकोऽहि नामक असुरोऽहन्यत ।[33] तेन बलनामासुरं हत्वा गावो रक्ष्यन्ते ।[34] स चत्वारिंशत्वर्षमन्वेषणं कृत्वा शम्बरं हतवान् ।[35] अखिले संसारे तस्य तुल्य योद्धा नास्ति । देवेषु मानवेषु च न कोऽपि इन्द्रसमः,न कोऽपि इन्द्रतोऽधिकः ।[36] तेन निजगुनेन 'देवराज' इति पदमलंक्रियते ।केवलमिन्द्र एव विश्वसंसारस्य स्वामी ।[37] स सर्वेषां प्राणिनां प्राणनाथः ।[38] स मानवानां देवानां च नेता ।[39] स युद्धशीलोऽभीष्टवर्षी धनाधिपतिरुग्रो नित्यतरुणः चिरन्तनः शत्रुधर्षको जरारहितो वज्रधारी प्रसिद्धो महानगुणसम्पन्नश्चेति ।[40] स प्रभूतबलानां धारकः ।अतः तस्य कृते 'शक्र' इति विशेषणपदम् ऋग्वेदे भूयो भूयो व्यवह्रियते ।[41] स मानवानं कल्याणकारी देवः ।अतः तस्य 'नृमण' इति नाम सार्थकः ।[42] ऋग्वेदे इन्द्रसम्बन्धितैः विशेषणपदैः तस्य वीरत्वं प्रकाशितम् ।यथा- भीमः, संक्रन्दनः, वीरः, जिष्णुः, धृष्णुः, द्रुश्ववनः, उग्रहन्ता, रक्षोहा, स्थावीरः, प्रवीरः, वाजी, वज्रबाहुः, शतमन्युः, अयुध्यः, मघवन्, वृत्रहनादयः ।

शत्रुभ्यः प्रजानां रक्षणं राज्ञः प्रधानं कर्तव्यम् । ऋषीणां परित्राणार्थमिन्द्रः सदा अग्रगामी । अतः प्राचीनर्षीन् निकशा इन्द्रो राजासीत् । दृष्टान्तोऽयम् ऋग्वेदे अनेकेषु स्थानेषु वर्तन्ते । यथा-

"त्वं राजा जनानाम्" (ऋक्. 8.64.3)

"प्र सम्राजं चर्षणीनामिन्द्रं स्तोता नव्यं गीर्भिः" (ऋक्.8.16.1)

"आ चर्षणि प्रावृषभो जनानां राजा कृष्टीनां पुरुहुत इन्द्रः" (ऋक्. 1.177.1)

अस्मात् ऋग्वेदे इन्द्रो दण्डधारी-न्यायकारीराजारूपेण विराजते । एतद्विहाय इन्द्रः प्रकृष्टधनदातारूपेणापि प्रसिद्धः । स सर्वविधानां धनानां स्वामी,स सुखानां बुद्धिनां प्राणानाञ्च दाता । तस्मात् अखिले ऋग्वेदे ऋषिभिः स सुप्रसिद्धदातारूपेण विभूषितो जातः । अनेन प्रकारेण ऋग्वेदाधारे इन्द्रदेवस्य संक्षिप्तं स्वरूपं प्रकटीभवति ।

## सन्दर्भग्रन्थसूची


1. मिश्रः, जगदीशचन्द्रः । वैदिकवाङ्मयस्येतिहासः । वाराणसी: चौखम्वासुरभारती प्रकाशनम् 2009 ।
2. उप्रैती, जयदत्त । वेद में इन्द्र । वाराणसी: चौखम्वा संस्कृत सीरीज अफिस 2012 ।
3. पाठकः, यमुना, सम्पादकः । निरुक्तम् । वाराणसी : चौखम्वा संस्कृत सिरिज अफिस 2010 ।
4. राय, रामकुमार, अनुवादक । वैदिक माइथौलोजी । वाराणसी : चैखम्बा विद्याभवन प्रकाशन 2007 ।
5. ठाकुर, अमरेश्वर, सम्पादक । निरुक्तम् । 1-4 खण्ड । कोलकाता : कोलकाता विश्वविद्यालय 2016 ।
6. भट्टाचार्य, विष्णुपद । वैदिक देवता । विश्वभारती : विश्वविद्यासंग्रह 1357 (बङ्गाब्द) ।
7. त्रिवेदि, रामगोविन्द, अनुवादक। ऋग्वेदसंहिता सायणाचार्य़कृत भाष्यसंवलिता । 1-9 खण्ड । वाराणसी : चौखम्वा विद्याभवन प्रकाशन, 2011।
8. सरस्वती, सत्यप्रकाश, सम्पादक। शतपथ ब्राह्मण । 1-3 खण्ड । दिल्ली : गोविन्दराम हासानन्द, 2010।
9. Apte VS, Compiler. The Practical Sanskrit – English Dictionary. Delhi: MLBD 2014.
10. Macdonnell AA, Vedic Mythology. Strssburg 1897.
11. Willson HH. Editor. Rig-veda Samhita.1-7 Vols. New Delhi: Cosmo publication 1977.


[26] इन्द्रो दिव इन्द्र इशे पृथिव्याः । ऋक्. 10.89.10
[27] यः सूर्यं य उषसं जजान योऽपां नेता । ऋक्. 2.12.7
[28] यः पृथिव्यां व्यथमानामदृंहद्यः पर्वतान्प्रकुपिताँ अरम्णात् ।
यो अन्तरिक्षं विममे वरीयो यो द्यामस्तभ्नात्स जनास इन्द्रः ।। ऋक्. 2.12.2
[29] संवृक समत्सु । ऋक्. 2.12.3
[30] यस्मान्न ऋते विजयन्ते जनासो यं युद्धमाना अवसे हवन्त । ऋक्. 2.12.2
[31] अहन्वृत्रं वृत्रतरं व्यंसमिन्द्रो वज्रेण महता बधेन । ऋक्. 1.32.5
[32] दैविक देवशास्त्र , पृष्ठा- 145
[33] औजायमानं यो अहिं जघान । ऋक्. 2.12.11
[34] गा उदाजदपधावलस्य । ऋक्. 2.12.3
[35] यः शंबरं पर्वतेषु क्षियन्तं चत्वारिंश्यांशरद्यन्वविन्दत् । ऋक्. 2.12.3
[36] सत्यमित्तन्न त्वा वाँ अन्यो अस्तीन्द्र देव न मर्त्यो ज्यायन् । ऋक्. 6.30.4
[37] एको विश्वस्य भूवनस्य राजा । ऋक्. 3.46.2
[38] यो विश्वस्य जगतः प्रणतस्पतिः । ऋक्. 1.101.5
[39] इन्द्र क्षितीनामसि मानुषीणां विश्वां दैवीनामूत पूर्वयावा । ऋक्. 3.34.2
[40] युद्धस्य ते वृषभस्य स्वराज उग्रस्य यूनः स्थविरस्य घृष्वेः ।
अजूर्यातो वज्रिणो वीर्याणीन्द्र श्रुतस्य महतो महानि ।। ऋक्. 3.46.1
[41] ऋक्. 1.62.4 , 8.13.15 , 8.55.3 , 8.81.11 , 10.134.3
[42] त्वं पिप्रोर्नृमणः प्रारुजः । ऋक्. 1.51.5